# केन्द्रीयसंस्कृतविश्वविद्यालयः
## मुक्तस्वाध्यायपीठम्

## प्रश्नकोषनिर्माणकार्यशाला

### प्रतिवेदनम्

के.सं.वि./मु.स्वा.पी./शै.वि.के./आ.गु.आ.के./2024-25/ दिनाङ्कः – 12/12/2024

मुक्तस्वाध्यायपीठस्य सर्वेषां शैक्षिकसदस्यानां कृते बेङ्गलूरुनगरे चन्नेनहळ्ळिस्थाने विद्यमाने जनसेवाविद्याकेन्द्रे प्रश्नकोषनिर्माणकार्यशाला 02-12-2024 तः 07-12-2024 पर्यन्तम् आयोजिता। 02-12-2024 तमे दिनाङ्के कार्यशालायाः अस्याः उद्घाटनकार्यक्रमः जातः। तत्र मुख्यातिथिरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः गोपबन्धुमिश्रवर्यः समागत्य परीक्षायाः प्रश्नानां च महत्त्वम् उदबोधयत्। विशिष्टातिथिरूपेण आगतः केन्द्रीयसंस्कृतविश्वविद्यालयस्य परीक्षानियन्त्रकः आचार्यः पवनकुमारः प्रश्नकोषनिर्माणस्य उद्देश्यं नियमान् च प्रत्यपादयत्। मुक्तस्वाध्यायपीठस्य निदेशकः आचार्यः रत्नमोहनझाः कार्यक्रमस्य अस्य आध्यक्ष्यम् अवहत्। मुक्तस्वाध्यायपीठस्य संयुक्तनिदेशकः श्रीवेङ्कटेशमूर्तिः कार्यशालायाः लक्ष्यं प्रास्ताविकं च अवदत्। डा. राहुलराजशेखरभट्टेन समागतानां समेषां स्वागतं कार्यक्रमसञ्चालनं च कृतम्। श्रीनवनीतकृष्णः धन्यवादाविष्कृतिम् अकरोत्।

षड्दिनात्मिकायाम् अस्यां कार्यशालायां सर्वे शैक्षिकसदस्याः प्रश्नकोषनिर्माणविषयकं ज्ञानं प्राप्नुवन्। द्वितीय-तृतीयदिनाङ्कयोः मूल्याङ्कनप्रकाराः, प्रदत्तकार्यस्वरूपं, प्रदत्तकार्याङ्गतया प्रश्ननिर्माणं, स्वपाठ्यानुसारेण प्रदत्तकार्यनिर्माणं सम्पादनं च, प्रदत्तकार्याणां प्रस्तुतिः, प्रश्नकोषनिर्माणदृष्ट्या प्रश्नानां प्रकारचिन्तनं प्रश्नकोषस्वरूपचिन्तनं च, प्रश्नकोषनिर्माणदृष्ट्या प्रश्नरचना इत्येते कालांशाः सञ्जाताः। चतुर्थ-पञ्चम-षष्ठ-सप्तमदिनाङ्केषु कालांशेषु प्रदत्तकार्यचिन्तनं, प्रदत्तकार्यप्रारूपनिर्माणं, प्रदत्तकार्याङ्गतया प्रश्नसज्जता प्रश्नचिन्तनं प्रश्ननिर्माणं, निर्मितप्रश्नानां प्रस्तुतिः सम्पादनं च, अध्यापकानां जिज्ञासानिवारणं, छात्रेभ्यः प्रदीयमानसूचनानिर्माणं, Google form द्वारा निर्मितप्रदत्तकार्यस्य परीक्षणम् इत्यादीनि कार्याणि विहितानि।

07-12-2024 तमे दिनाङ्के अस्याः कार्यशालायाः समारोपकार्यक्रमः जातः। समारोपकार्यक्रमेऽस्मिन् विशिष्टातिथिरूपेण समागतः भोपालपरिसरस्य सहनिदेशकः शिक्षाशास्त्रविभागाध्यक्षश्च आचार्यः वै. एस्. रमेशः सर्वान् सभ्यान् उदबोधयत्। कार्यक्रमस्यास्य अध्यक्षः आचार्यः रत्नमोहनझाः स्वागत-धन्यवादवचांसि प्रास्तवीत्। श्रीवेङ्कटेशमूर्तिः सभायाम् उपस्थितः आसीत्। अस्यां कार्यशालायां त्रयोविंशतिः प्रतिभागिनः भागम् अगृह्णन्। कार्यक्रमस्यान्ते सर्वेभ्यः प्रतिभागिभ्यः प्रमाणपत्राणि प्रदत्तानि।

P.T.O.



दीपज्वालनपुरस्सरं कार्यशालायाः उद्घाटनं
कुर्वन्तः अतिथयः



कार्यशालां समुद्घाट्य भाषामाणः
आचार्यः गोपबन्धुमिश्रवर्यः



प्रश्नकोषनिर्माणमधिकृत्य उद्बोधयन्
परीक्षानियन्त्रकः



मुख्याभ्यागताः




समारोपकार्यक्रमे भाषमाणः
आचार्यः वै. एस्. रमेशमहाभागः



कार्यशालायाः प्रतिभागिनः

तान्त्रिकप्रबन्धकः (CIQA) / का.प्र.

निदेशकः (आ.गु.आ.के., मु.स्वा.पी.)